
ஸ்ரீ:

ஸ்ரீமதே ராமாநுஜாய நம:



ஸ்ரீமத் வேதமார்க்க ப்ரதிஷ்டாபநாசார்யோபயவேதாந்த

ப்ரவர்த்தக துரீணரான

ஸ்ரீமான் குன்றத்தூர் மோர்முன்னூர்ஐயன்

என்னும்

வரதாசார்யர்

அருளிச்செய்த

நாயமாத்மா ச்ருதி பாஷ்யம்

பரிசோதகர்

ஸ்ரீ உ.வே. S. கிருஷ்ணஸ்வாமி அய்யங்கார்

அட்வகேட்

"ஸ்ரீவைஷ்ணவ ஸுதர்சனம்" ஆசிரியர்

3, புத்தூர் அக்ரஹாரம்,

திருச்சி-17

கீர்த்திமூர்த்தி ஸ்ரீ உ.வே. காரப்பங்காடு வேங்கடாசாரியார்

ஸ்வாமி நினைவு வெளியீடு

1998

श्री:

''नायमात्मा'' श्रुति-भाष्यम्

[1]''नायमात्मा प्रवचनेन लभ्यः न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूं स्वाम्'' इति श्रुतिः। अस्यास्त्वर्थो द्वेधा भाष्यकारैरभिहितः। साधनलक्षणस्य द्वितीयचरणे [2]''परमतस्सेतून्मान'' इत्याद्यधिकरणे [3]''उपपत्तेश्च'' इति सूत्रस्य विषयत्वेन इमां श्रुतिं उदाहृत्य अस्याः अर्थः संग्रहेण ''अनन्योपायत्वश्रवणात्'' इत्युक्तः। प्रथमसूत्रे परमपुरुष वरणीयता-हेतुगुणविशेषपरत्वेन विस्तरेणेयं श्रुतिर्व्याख्याता। उभयविधमपि भाष्यं श्रुतप्रकाशिकाचार्यैः व्याख्यातम्। तदनुरोधेन तदुभय भाष्यानुगुणं तमिह विस्तृणीमहे।

तत्र ''अनन्योपायत्वश्रवणात्'' इति अभिवदतो भाष्यकारस्यायं भावः - परमपुरुषस्य स्वप्राप्तेः स्वस्यैव साधनत्वं, नान्यस्येति। तथाहि — श्रुतेः पूर्वार्धेन साधनान्तरस्य भगवत्प्राप्त्युपायत्वं प्रतिषिध्यते, उत्तरार्धेन भगवत एव स्वप्राप्तौ स्वस्यैव साधनत्वमुच्यते। तत्र ''नायमात्मा प्रवचनेन लभ्यः'' इति प्रवचनपदेन मननं लक्ष्यते। मननफलत्वात्प्रवचनस्य, मननस्य आचार्य प्रवचन फलत्वाद्वा, प्रोच्यते अनेनेति करणव्युत्पत्त्या वा प्रवचनं—मननम्।

---

1. कठ (2-23) 2. शा.मी. (3.2.30) 3. शा.मी. (3.2.34)

आत्मशब्देन – [1]"आत्मा वा अरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यः" इति श्रुतिगतात्मशब्दः स्मार्यते। अनेन तत्रोक्तश्रवणमनन निदिध्यासनानां अनुपायत्वं उच्यत इति गम्यते। निषेधस्य प्रसङ्गसापेक्षत्वात्। अयं इत्यनेन स्वेतर समस्तवस्तु वैलक्षण्यं विवक्षितम्। तच्च [2]"अमृतस्यैष सेतुः" [3]"य आत्मदा बलदा" [4]"धातुः प्रसादात् महिमानमीशम्" इत्यादि श्रुतिसिद्धं स्वस्योपायोपेयत्वरूपं। तदुपपादकं आत्मपदम्। "आप्नोतीति ह्यात्मा"। नियन्तृतया व्याप्य धारक इत्यर्थः।

अनेन स्वाधीनाशेषसत्तास्थितियत्नफलत्वं परमात्मनोवगम्यते। अनेन जीवात्मनः कर्तृत्वमपि [5]"परात्तु तच्छ्रुतेः" इति सूत्रोक्त प्रकारेण परमात्मायत्तमिति सिद्ध्यति। अतः एवंभूतः परमात्मा न प्रवचनेन लभ्यः- लब्धुं–प्राप्तुं योग्यो न भवति। अनेन योग्यता-प्रतिषेधात् नैरपेक्ष्यमेव सिद्धोपायस्य स्वरूपं इत्यवगम्यते। [6]"मामेकं" [7]"मामेव" [8]"तमेव" [9]"त्वमेव" इत्यादिवचनात्।

न मेधया – मेधा अत्र निदिध्यासनं, परिशेषात् अत्र पृथक् नञ् प्रयोगो हि श्रवणादीनां पृथक् साधनत्वनिषेधविवक्षया। मेधाशब्देन – अविच्छिन्नस्मृतिसन्ततिरूपत्वासकृदावृत्ति रूपत्वध्रुवानुस्मृतित्व दर्शनसमानाकारत्वभक्तिरूपापन्नत्वाद्या-कारविशिष्टं मोक्षसाधनभूतं ध्यानं विवक्षितम्। [10]"एवं प्रत्यक्षतापन्नां

1. बृहदा 2. छान्दो 3... 4....
5. शा.मी. (2–3–40) 6. गीता (18–66) 7. गीता (7–14)
8. गीता 9. भगवच्छास्त्र 10. श्रीभाष्ये लघुसिद्धान्ते

अपवर्गसाधनभूतां स्मृतिं विशिनष्टि'' इत्यत्र भाष्ये ध्यानस्य विशेषान्तर विशिष्टत्व सिद्धिवत् भक्तिरूपत्व विशेषोपि सिद्ध इति मन्तव्यम्। तदानीमेव तस्य अपवर्गसाधनत्वात्। अत: तादृशेन मोक्षसाधनतया विहितेन उपासनात्मकेन भजनेन न लभ्य: इत्यर्थ:। न बहुना श्रुतेनेति – श्रुतमत्र श्रवणं – मननपूर्वभावि वाक्यार्थावधारणम्। बहुनेति विशेषणेन श्रवणस्य साङ्गसशिरस्क स्वाध्यायाध्ययन जनितापातप्रतीतिसंजात रागविशेषेण सदाचार्य सकाश समधिगत क्रमविशेषनियामक संगति विशेषविशिष्ट पूर्वोत्तरमीमांसार्थवत्वरूपं पौष्कल्यं विवक्षितम्। तेन न लभ्य इति निर्देशेन भक्त्युपायाङ्गभूतकर्मज्ञानाभ्यामपि न लभ्यत इति सिद्ध्यति। अनेन श्रवणमनननिदिध्यासनानां पृथक्निषेधेन [1]''कर्मज्ञानमुपासनञ्च शरणं व्रज्येति चावस्थिनान् सन्मार्गानपवर्गसाधनविधौ सद्वारकाद्वारकान्। एक द्व्याकृतियोगसंभृत पृथग्भावानुभावानिमान् सम्यक्प्रेक्ष्य शरण्य सारथिगिरां अन्ते रमन्ते बुधा:।।'' इत्युक्तप्रकारेण अङ्गाङ्गितया पार्थक्येन च मोक्षसाधनत्वं नास्तीति गम्यते। अनेन त्रितयनिर्देशेन अन्यदेशवासादिकमप्युपलक्ष्यते। [3]''सर्वधर्मान् परित्यज्य'' इत्युक्तत्वात्। तर्हि मोक्षोपाय: क इत्याकाङ्क्षायामाह ''यमेवैष वृणुते तेन लभ्य:'' इति। यमेव चेतनमेष परमात्मैव वृणुते तेनैव लभ्य: इत्यर्थ:। यमिति सामान्योक्त्या [4]''समोहं

---

1. अधिकारसंग्रहे 2. 3. गीता 18-66
4. गीता 9-29

सर्वभूतेषु'' इत्युक्तप्रक्रियया वरणीयानां जात्याकार स्वभावज्ञान-वृत्ताद्युत्कर्ष अपकर्ष तारंतम्यराहित्यं अभिप्रेतम्। [1]''देवानां दानवानां च सामान्यं अधिदैवतम्'' इति सर्वसाधारणत्वात् भगवतः। यमेवेत्येवकारेण भगवदभिप्रायविशेष विषयीकृतत्वहेतुभूतं आकिञ्चन्यादिकं यत्पदाभिप्रेतमिति सर्ववरणप्रसङ्गापादनं अपोदितं वेदितव्यम्। आकिञ्चन्यं इष्टानिष्टासाधन प्रवृत्तिनिवृत्तिपरिहारेण स्वरूपेणावस्थानम्। तादृशाधिकारी क्वचिल्लभ्यते। पूर्वं नायमात्मेत्यादिना साधनान्तराणां निषिद्धत्वात् साधनान्तरराहित्यं वरणीयस्य यत्पदाभिप्रेतमित्यवगम्यते। यमेव — साधनान्तर-विरहितमेव। अनेन अनन्यगतित्वं [2]''अविद्यातो देवे परिबृढतया वा विदितया स्वभक्तेः भूम्ना वा जगति गतिमन्यामविदुषाम्'' इत्याचार्योक्तमभिप्रेतम्। एष इति पदेन निरपेक्षोपायत्वं परामृश्यते। तदन्वितेन एवकारेण तन्निरपेक्षोपायत्वं स्थिरीक्रियते।

ननु—कथं उपायस्य निरपेक्षत्वम्; तथा सति बन्धस्याविशेषेण सर्वमुक्ति प्रसङ्गात्; वैषम्यंनैर्घृण्यादि प्रसङ्गाच्च। [3]''एष एव साधु कर्मकारयति। तं यं एभ्यो लोकेभ्य उन्निनीषति'' इति तु आनुकूल्य व्यवस्थितविषयमिति अभाषि। [4]''रक्ष्यापेक्षां प्रतीक्षते'' [5]''कृतप्रयत्नापेक्षस्तु'' इत्यादिना सापेक्षत्वमेव प्रतीयते।

---

1. जित 2. भट्टर् मुक्त 3. छान्दो
4. पांच 5. शा.मी. (2–3–41)

अद्वेषाभिमुख्यादेः यादृच्छिकादेर्वा अस्य अङ्गीकार्यत्वात् तैरेव सापेक्षत्वं दुर्निवारं इति चेत्;

उच्यते – सर्वकारणस्य सर्वफलप्रदस्य निरवधिकदयस्य निरङ्कुशस्वतन्त्रस्य परमपुरुषस्य शास्त्रवश्यचेतनेषु अवस्थात्रयमस्ति, औदासीन्यं अनुमन्तृत्वं, प्रयोजयितृत्वं चेति। [1]"कर्ता शास्त्रार्थवत्त्वात्" इत्युक्त जीवकर्तृत्वस्य [2]"परात्तु तच्छ्रुतेः" इति परमात्माधीनत्व प्रतिपादनेन विधिनिषेधशास्त्रानर्थक्य प्रसक्तौ [3]"कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः" इति तत्परिहरणात्। प्रवृत्तस्य प्रवर्तकोह्यनुमन्ता अप्रवृत्तस्य प्रवर्तकश्च प्रयोजयिता, प्रथमप्रवृत्ति दशायां परस्य औदासीन्यं, द्वितीयादि प्रवृत्तिषु अनुमन्तृत्वं, अत्यन्तानुकूल्य प्रातिकूल्यव्यवसितविषयेषु प्रयोजयितृत्वं चेति विभागः।

ननु [4]"अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा" [5]"य आत्मानमन्तरो यमयति" इत्यादि प्रक्रियया परमात्मनो निरंकुशस्वातन्त्र्येण सर्वप्रवर्तकत्वे जीवस्य स्वाधीन प्रवृत्त्यभावेन कर्मफलभाक्त्वं न स्यात्; अतः एव विधिनिषेधशास्त्रवश्यत्वं च न स्यात्, परमात्मनः तत्कर्मसापेक्षप्रवर्तकत्वे तदनुगुणफलप्रदत्वे च निरंकुशस्वातन्त्र्यं भज्येत। सर्वप्रवृत्तेर्भगवदिच्छाधीनत्वे क्षेत्रज्ञस्य सुखादिभाक्त्वं न स्यात्। प्रथमप्रवृत्तेः स्वाधीनतया फलभाक्त्वसम्भवे

---

1. शा.मी. (2-3-33)
2. शा.मी. (2-3-40)
3. शा.मी. (2-3-41)
4. यजु-आर (प्र-3)
5. बृहदा (5-3)

तत्र आद्य प्रवृत्ते: परमात्मानधीनतया [1]"पराच्चु तच्छ्रुते:" इत्युक्तं व्याहतं स्यात्। उपेक्षकत्वानुमन्तृत्वाभ्यां तादधीन्यसिद्धौ वैषम्य नैर्घृण्यादि प्रसङ्गेन तदुभयाभ्युपगमायोगात्। तत्रापि कर्मसापेक्षत्वेच पूर्वोक्तदोष:। किञ्च उपेक्षकत्वञ्च औदासीन्यम्। तच्च-तत्राभिसन्धि-विरह इति वक्तुं न शक्यते सर्वज्ञत्वात्परमात्मन:। अनुमन्तृत्वं च प्रवृत्तस्य प्रवर्तकत्वं। तत्राहित प्रवर्तकत्वे निर्वर्तनक्षमस्यापि तद्विषये प्रवर्तकत्वेन तदेव नैर्घृण्यम्। अप्रवृत्तस्य प्रवर्तकत्वञ्च प्रयोजयितृत्वम्। एतच्च-प्रथमप्रवृत्त्यपेक्षया द्वितीयादिप्रवृत्त्यपेक्षया वा। पूर्वत्र उपेक्षकत्वं न स्यात्, निर्दयत्वादि च स्यात्। उत्तरत्र अनुमन्तृत्व प्रयोजयितृत्वयो: वैषम्यं न स्यात् प्रयोजयितृंत्वकल्पन वैयर्थ्यञ्च।

किञ्च-चेतनस्य प्राथमिकेच्छाप्रयत्नयो: उत्पत्ते: परमात्माधीन-त्वाभावे तस्य सर्वकारणत्वं न स्यात्; पुण्यपापप्रवृत्त्यनुगुणेच्छादे: पूर्वकर्मफलरूपत्वेन तत्र कारणत्वाभावे सर्वफलप्रदत्वञ्च न स्यात्; अतस्तत्रापि कारणत्वं अवश्याभ्युपगन्तव्यम्, ततश्च तत्र ईश्वर: संकल्पत: कारणं स्यात्; "अयमिच्छेत्" "अयं प्रयतेत" इति तादृशामोघतत्संकल्पपरतन्त्रतया जीवस्य स्वातंत्र्याभावात् स्वतंत्र-कर्तृत्वं तन्निबन्धनभोक्तृत्वं च न स्यात्; औदासीन्यानुमंतृत्वप्रयोजयितृत्वावस्थानां वैषम्यं च न स्यात्; प्रवर्तनं च परमात्मनो न वायूदकादिवत् प्रेरणेन, अपि तु इच्छाजननद्वारेण;

1. ब्र.मी. (2-3-40)

अत: वैषम्यमित्यादि दोषशतोन्मेषेण पूर्वोक्तनिर्वाहो न घटत इति चेत्;

उच्यते-तादृशाऽ वस्थात्रयं न कल्प्यते; अपि तु [1]"अन्त: प्रविष्टश्शास्ता जनानाम्" [2]"अध्यक्षश्चानुमन्ता च" "एष एव साधु कर्मकारयति" इत्यादि श्रुतिबलात् अभ्युपगम्यते। श्रुतिश्च पूर्वोक्त समस्त दोष परिहारमभिप्रेत्य तथा वदति; तथा हि जीवस्वातन्त्र्यं सर्वथा परमात्माधीनं, स्वासाधारणधर्मत्वात् स्वाधीनञ्च द्वयोस्साधारण धनवत्; तत्र भगवदधीनत्वांशे पारतन्त्र्यात् विधि निषेधागोचरत्वमेव, स्वांशे स्वातन्त्र्यात् विधिनिषेधगोचरत्वोपपत्ति:। अन्य सापेक्षप्रवृत्तावपि विधिनिषेधगोचरत्वं रथाकर्षणादिषु दृष्टम्। ततश्च साधारणद्रव्ये परानुमत्या स्वांशमादाय राज्ञ उपायने दत्ते तत्प्रसाद हेतुक फलान्वय: प्रथमप्रवृत्तस्यैव दृश्यते न तु अनुमन्तु:, तद्वत् स्वस्वातन्त्र्यांशेन प्रथमत एव पुण्यादिषु परानुमत्या प्रवृत्तस्य जीवस्यैव कर्मफलभाक्त्वं न त्वनुमन्तु: परमात्मन: तस्य नियन्तृ-त्वात्। "अनश्नन्नन्योभिचाकशीति" इति धर्मिग्राहकबाधाच्च न फलान्वय:। लोके हि अनुमन्तु: फलान्वये न अनुमन्तृत्वप्रयुक्त:, अपितु शास्त्रवश्यत्वप्रयुक्त:, ततो जीवस्य स्वातन्त्र्यं विधिनिषेध साफल्यं परमात्मन: तत्प्रवृत्त्यनुगुणफलदायित्वरूप नियन्तृत्वं फलानन्वयश्च सिध्यन्ति।

---

1. यजु-आर (प्र-3) 2. बृहदा

अथ-अंशे जीवस्य स्वातन्त्र्यात् प्रथमप्रवृत्तौ "अध्यक्ष" इत्याद्युक्तं परमात्मनः उपेक्षकत्वं उपपन्नम्; अंशे परमात्मनः स्वातन्त्र्यात् "अनुमन्ता च" इत्याद्युक्तमनुमन्तृत्वं प्रयोजयितृत्वं च उपपद्यते सर्वजीवानां सामान्येन चिच्छक्ति प्रवृत्ति शक्त्योः करणकलेबररूप परिकरलाभस्य च परमात्माधीनत्वात् कर्तृत्वमात्रं परायत्तं विशेषकर्तृत्वं च परानुमतिसापेक्षत्वात् परायत्तं, अतो जीवस्य विधिनिषेधगोचरत्वाय अंशे स्वातन्त्र्यं [1]"कर्ता शास्त्रार्थवत्वात्" इत्यभ्युपगतम्। तर्हि नियमनश्रुति सङ्कोचः प्रसजेत् प्रथमं उपेक्षकत्वादिति चेन्न; यावता विधिनिषेधशास्त्रानर्थक्यं परिह्रीयेत तावत् संकोचस्य अभिमतत्वात्; अतः परं संकोच एव अनिष्टः न च सोभ्युपगतः। किंच संकोच एव नास्ति तावत् संविच्छक्तिं प्रवृत्तिशक्तिं च दत्वा, शक्तिमत्वे सति अनिवार्यत्व लक्षणं स्वातन्त्रयं जीवस्य आपाद्य, आद्य प्रवृत्तौ परस्य तूष्णीं भावो न स्वातन्त्र्यवैकल्यावहः, किन्तु तदतिशयावह एव। यथा अमात्यादिषु राज्ञः। न च जीवस्य स्वातन्त्र्यं पराधीनत्वं चेति व्याघातः, अमात्यस्वातन्त्र्ये तदभावात्; तदभावश्च राज्ञा तत्प्रवृत्तेरनिवारणात्। तस्मात् नियमनश्रुतेः असङ्कोचः।

यदुक्तं-परमात्मनो जीवकर्मानपेक्षप्रवर्तकत्वे, तदनुगुणफल-प्रदत्वे च निरंकुशस्वातन्त्र्यं भज्येतेति तन्न, कर्मणोपि

1. शा.मी. (2-3-33)

तत्संकल्पाधीनत्वात् यथा संकल्पं कुर्वत: स्वातन्त्र्यपौष्कल्यमेव भवति। कर्मणोपि भगवदिच्छाधीनत्वं भाष्ये प्रपञ्चितम्॥ [1]''अनभिज्ञो भवान् पुण्यापुण्यकर्मस्वरूपयो:'' इत्यारभ्य ''स भगवान् पुरुषोत्तम: अवाप्तसमस्तकाम: सर्वज्ञ: सर्वेश्वर: सत्यसंकल्प: स्वमाहात्म्यानु गुणलीलाप्रवृत्त: 'एतानि कर्माणि समीचीनानि एतानि असमीचीनानि' इति कर्मद्वैविध्यं संविधाय'' इत्यादिना।

तर्हि सर्वं कर्म तदिच्छाधीनं चेत्, ज्योतिष्टोमादे: पापत्वं ब्रह्महत्यादे: पुण्यत्वं च स्यादिति चेन्न; अनादि पुण्यापुण्य व्यवस्थाया: भगवदनादिस्वातन्त्र्यनिबन्धनत्वादिति ब्रूम:। तथाहि [2]''वैकुण्ठे तु परे लोके श्रिया सार्धं जगत्पति:। आस्ते विष्णुरचिन्त्यात्मा भक्तै: भागवतैस्सह॥'' इत्युक्तप्रक्रियया निरतिशयानन्दयुक्त: परमात्मा स्वमाहात्म्यानुगुण लीला प्रवृत्तस्सन् स्वलीलोपकरणतया कांश्चित् जीवविशेषान् विभज्य, त्रिगुणं कालमपि तदुपकरणत्वेन परिकल्प्य, प्रकृतिमपि महदभिमान भूतकरणावलिकोरकिणीं च कृत्वा, तया च अपरिमिताण्डानि च सृष्ट्वा, तानि जीवानां भोगस्थानतया परिकल्प्य, तेषां चिच्छक्तियोगं प्रवृत्तिनिवृत्तिशक्तियोगंच दत्वा, तत्प्रवृत्तिनिवृत्त्यनुगुणपुण्यापुण्य व्यवस्थामपि परिकल्प्य तद्ज्ञापकत्वेन शास्त्रं च प्रदर्श्य तत्तत्कर्मसु प्रवृत्तस्य तत्तदनुगुणं सुखदु:खात्मकं फलं च प्रयच्छतीति परमात्मनो

---

1. शा.मी. (2-2-3) सू.भा. 2. पांच

जीवकर्मानुगुण प्रवर्तकत्वे तदनुगुणफलप्रदत्वेच न निरंकुश-स्वातन्त्र्यभङ्ग इति राज्ञां अक्षादिभिः द्यूतादिष्विव।

तर्हि सर्वप्रवृत्तेः तदिच्छाधीनत्वे पुण्यपापादिषु तस्यैव प्रवर्तकतया जीवस्य तत्फल भाक्त्वं न स्यात्। ईश्वरस्य निर्दयत्व - विषमत्वादि प्रसङ्गश्चेति चेन्न; यथा पित्रोर्दोषः तदधीनवैभवं च पुत्रस्य न हीयते, स्वकर्मानुगुणफल- भाक् च स एव भवति तद्वदेव जीवस्य तदधीनवैभवत्वं स्वप्रवृत्त्यनुगुणफलभाक्त्वं च भवति। परमात्मनस्तु सर्वेषामविशेषेण युगपत् करणकलेबरदानात् सदसद्विवेचकशास्त्रप्रदानाच्च सर्वसमत्वसदयत्वादि सिद्धेश्च इति न किञ्चिदपहीनमिति।। [1]"करणकलेबरैर्घटयितुं दयमानमनाः" [2]"मानं प्रदीपमिव कारुणिको ददाति" इति हि आचार्योक्तिः।

यदुक्तं-जीवप्रथमप्रवृत्तेः परमात्मानधीनतया तत्र तत्कर्तृत्वस्य परमात्मानधीनत्वं स्यादिति तदसत्; आदावेव करणकलेबरसह(?) तत्प्रदानादेः चेतनसर्वकार्य साधारणत्वात् पश्चादपि करणकलेबर व्याप्तितद्धारण तत्सामर्थ्यापादनादेश्च सार्वकालीनत्वाच्च तन्मुखेन प्राथमिकेच्छादेरपि भगवदधीनतया तत्रापि तत्कर्तृत्वस्य परमात्मा-धीनत्वात्। तत एव प्राथमिकेच्छादावपि कारणत्वात् न परमात्मनः सर्वकारणत्वहानिः। अत एव न सर्वफलप्रदत्वहानिश्च।

---

1. श्रीरङ्ग स्त (2-14).   2. श्रीरङ्ग स्त (2-1)

यच्चोक्तं वैषम्यनैर्घृण्यादिप्रसङ्गेन भगवत औदासीन्यानु-मन्तृत्वाभ्युपगमायोग इति: तदपि न साधारण विशेषोपकार वैषम्येण परिहृतत्वात्। तथाहि देहेन्द्रियादिवैषम्यस्य भगवदनादि-स्वातन्त्र्य व्यवस्थितस्वरूप पुण्यापुण्यरूप कर्म कृतत्वात्। गुणत्रयोद्भवाभिभवरूपविशेषस्य रुचिवासनाविशेषोन्मेषस्य च तत्-तद्देहारम्भकादृष्टवशादेव जन्मकाल एव सिद्धत्वात्, विषयविशेष-सन्निधेश्च भोगादृष्टप्रवाहकारितत्वात्, गुणत्रयतारतम्य वासनाविशेषो-द्बोधवस्तुस्वभावविशेष रूपासाधारण कारणसचिवैस्साधारण कारणै: प्राथमिकेच्छानिष्पत्ति: तत एव प्रयत्नश्चेति तयोर्विशेषोपकाराभावात् ईश्वरस्य औदासीन्यं युक्तम्। गुणविशेषस्य रुचिविशेषहेतुत्वं [1]"आहारा: सात्विकप्रिया:" इत्यादि वचनै: मनुष्यादीनां अन्नादिषु अन्वयव्यतिरेकतश्च सिद्धम्।

ननु-तत्तद्भोगादृष्टस्य फलप्रदानाय विषयसन्निधानादेरपि ईश्वरकारितत्वात् कथं औदासीन्यं इति चेन्न; तत्र अभिसंधिविरहात्। सर्वज्ञस्य तस्याभिसन्धिविरहश्च सर्वचेतनानां सामान्येन सुखदु:ख प्रदानेच्छयैव विषयसन्निधापनात्, न तु साधनान्तरानुष्ठानेच्छया। घटनिरीक्षणाय प्रदीपमारोपयन् पुरुष: पटार्थिपुरुषान्तर प्रवृत्तौ प्रवर्त्तकत्वनिवर्त्तकत्वयो: अभावात्, तत्र उदासीन एव दृश्यते; अत: प्रथममौदासीन्यमेव युक्तम्। अत एव सर्वज्ञस्याप्यभिसन्धिविरहो

---

1. गीता (17-8)

युज्यते। अनुमन्तृत्वौदासीन्यस्य भेदोपि सिद्ध्यति। एवं उदासीनत्वात् जीवस्वातन्त्र्यमपि जीवति। द्वितीयेच्छाप्रयत्नादिषु हेत्वन्तरासन्निधावपि तस्यापि विषयस्य बुद्धौ सन्निधापनात् अभिसन्धीयमानविषय सन्निधापनमेव विशेषोपकार: इदमेवच अनुमन्तृत्वम्। एवं भगवत: प्रथमं पुण्यपापयो: प्रयोजयितृत्वं नास्ति-उपेक्षमाणत्वात्; पश्चात् अनुमन्तृत्वं अस्त्येव। क्वचित् विषये प्रयोजयितृत्वमप्यास्ति। एवं ईश्वरस्य अवस्थात्रययोग: स्वस्वातन्त्र्य विशेषकृत एव। तत्रच प्रमाणमपि दर्शितम्। अनुमन्तृत्वं तु प्रथमं हिताहितयो: प्रवृत्तस्य केनचिद्विघ्नेन निवृत्तस्य तत्राविघ्नेन प्रवर्तनम्। तदनन्तरं च तदनुगुणफलदानम्। तच्च तत्र हिते प्रवर्तनं अनुग्रहरूपम्। अहितेतु निग्रहरूपम्। आज्ञातिलङ्घनप्रवृत्तत्वेन कुपितत्वादनुमति: फलदानं दण्डप्रकार एव। राज्ञ: स्वशासनातिवृत्तिप्रवृत्ते अनुमतिवत्।

ननु-अहितप्रवृत्तविषये अनुमन्तृत्वे प्रयोजयितृत्वेच भगवतो निर्दयत्वादि प्रसङ्ग इति चेन्न-अस्थानदयाया: स्थाननिग्रहस्य च लोके गुणत्वदोषत्व दर्शनाभावात्। राजादीनां दण्ड्या दण्डनादे: दोषत्वं शास्त्रवश्यक्षेत्रज्ञत्वप्रयुक्तं इति चेत्, तर्हि तेषां अनुग्रहादे: गुणत्वमपि तत्प्रयुक्तं स्यात्, तत्रैव तयो: तथात्वदर्शनात्। अतो निर्दयत्वहेतु: अनैकान्तिक:। नं च निवर्तनक्षमस्यापि कथं उपेक्षणमिति शङ्कनीयम्। सामान्येन शास्त्रद्वारा अहितप्रवृत्ते: निवारितत्वात्।

प्रवृत्ति विशेषकाले तु विशेषनिवारकत्वात् भावरूपोपेक्षकत्वं स्वातन्त्र्यात्। तादृक् स्वातन्त्र्यस्य दोषत्वं प्रत्यक्षा-गोचरेश्वराभ्युपगमानभ्युपगमाभ्यां आश्रयासिद्धि धर्मिग्राहक-मानबाधितमिति श्रुतप्रकाशिकायां प्रपञ्चितम्। वरदगुरुभिश्च तत्वसारे इदं सर्वं श्लोकरूपेण संगृह्य स्पष्टमभिहितम् – [1]''दुष्कर्म-स्वनिवर्तनानुमनने पुंसः करोत्यच्युत स्स्वातंत्र्येण निरङ्कुशेन सगुणश्रुत्या न दोषो हरेः। दृष्टश्चारिषु निग्रहो गुणतया लोके न दोषात्मना न स्यादाश्रयसिद्धिरौपनिषदं नोचेत्प्रमाणं वचः'' इति। अतो न निर्दयत्वादि प्रसङ्गः। एवं ईश्वरस्य औदासीन्यं अनुमन्तृत्वं च उपपन्नम्, तयोर्भेदश्च सिद्धः। अत एव जीवस्य स्वातन्त्र्यमप्युंपपन्नम्। स्वातन्त्र्यं च स्वेच्छानुगुण प्रवृत्तिनिवृत्ति सामर्थ्ये सत्यनिवार्यत्वम्।

ननु – पूर्ववासना तदधीनेच्छापरवशत्वाद्वायूदकादि प्रेरितस्येव न जीवस्य स्वातन्त्र्यमिति चेन्न – इच्छोत्पत्तेः प्रवृत्तिनिवृत्तिसामर्थ्य नाशकत्वाभावात् ओदनेच्छायां जातायां अपि, तस्य विषसं-पृक्तत्वज्ञानेन तदिच्छानिवारणसामर्थ्यमेव चेतनस्य दृश्यते; काष्ठविक्रयकस्य महानिधिलाभोपायज्ञानेन तत्संपादनेच्छानिवारणं च दृश्यते। एवं प्रत्यवायस्य अतिशयितफलान्तरस्य वा अज्ञाने सति इच्छान्तरनिवारण सामर्थ्य दर्शनेन पुरुषस्य स्वातन्त्र्योपपत्तेः

१. तत्वसारे

कर्तृत्वं युज्यते इष्टतमेषु प्रवर्तकवासनावत् अनिष्टादिषु निवर्तक-वासनायाश्च विद्यमानत्वात्; कृत्याकरणाकृत्यकरणेषु इच्छा निवारण क्षमोपि प्रत्यवायानादरेण स्वेच्छां न निवारयतीत्येष एव अपराधो जीवस्य दण्ड्यत्वे हेतु:। शास्त्रीय प्रत्यवायादिज्ञान सामर्थ्याभावात् तिरश्चां अशास्त्रवश्यत्वम्। तदानीमपि परो जीवस्य स्वेच्छानिवारणादि सामर्थ्यं न नाशयति, अत: तस्य स्वातन्त्र्यम्। [1]ईदृशमेव विशेषोपकारं प्रथमत एव केषुचित् ईश्वर: करोति, तत्र प्रयोजयितृत्वं इत्यवस्थात्रय वैषम्यम्।

"अल्पानुकूल्येन विपुलापराधसहत्वात् दयादिगुणानां सविषयत्वमिति" "अन्यत्र दयाया: सविषयत्वादित्यर्थ:" इति श्रुतप्रकाशिकानुसाराच्च यथोक्तमेव प्रयोजयितृत्वम्। अतोत्र पूर्वोक्त चोद्यानवकाश:। एतत्सर्वं श्रुतप्रकाशिकायां विस्तरेण प्रतिपाद्य पुनरपि कारिकारूपेण सङ्गृहीतम्।

[2]"अत्रायं सङ्ग्रह:- वैयर्थ्यं यावता न स्यात् विधानप्रतिषेधयो:। नियन्तृत्व श्रुतेस्तावान् संकोचो न तु अत: पर:।। बाह्यान्त: करणव्याप्ति तच्छक्त्याधानधारणै:। साधारणोपकारै: स्यात् इच्छादे: करणं पर:।। भोगादृष्टोपनीतार्थ स्वभावात् वासनान्वितात्। इच्छादे: मनसोत्पत्तौ युक्तोदासीनता विभो:।। अभिसन्ध्यन्तरप्राप्ते वस्तुनि अन्यत्र केनचित्। उपयुक्तेप्युदास्ते हि तस्य प्रापयिता पुमान्।

1. ईदृशं - अनुमन्तृत्वनिर्वचनावसरोक्तम् 2. परायत्ताधिकरणे

सामर्थ्ये सत्यनार्थत्वात् स्वतन्त्रो जीव उच्यते। स ह्यात्मनो विषज्ञानात् स्वेच्छयेमपि नियच्छति॥ सन्निधापक वैभुर्यैश्वर्यं बुद्धिस्थतां नयन्। प्रयोजकश्चेनुमन्ता च भवतीशः तदा तदा। पूर्वप्रवृत्तेश्च फलं अनुमत्यादिकं भवेत्। दयादीनां गुणानां च सुलभं विषयान्तरम्॥ अमात्यस्य स्वतन्त्रत्वे राज्ञः तत् नावहीयते। एवमेव परस्यापि जीव स्वातन्त्र्यदायिनः॥ न स्वातन्त्र्यं पराधीन स्वरूपात् प्रच्युतं भवेत्। स्वातन्त्र्यदायिना पुंसा तत्प्रवृत्त्यनिवारणात्॥ ततो जीवानां स्वातन्त्र्ये विधिनिषेधशास्त्रसाफल्ये परमात्मनस्सर्वकारणत्वं सर्वफलप्रदत्वं निरङ्कुशस्वातन्त्र्यं अवस्थात्रयवैषम्यं दयादिगुणानां विषयवत्त्वं वैषम्यनैर्घृण्यपरिहारश्चेति सर्वमुपपन्नं'' इति। अतः एवंविध निरङ्कुशस्वातन्त्र्यमेव सिद्धोपायस्य भगवतो निरपेक्षत्वम्। [1]''रूच्यापेक्षां प्रतीक्षते'' [2]''कृतप्रयत्नापेक्षस्तु'' इत्याद्युक्तं सापेक्षत्वं प्रथमप्रवृत्त्यपेक्षया; तत्र च औदासीन्यहेतुः स्वातन्त्र्यमेवेति पूर्वमेव प्रतिपादितम्।

यादृच्छिककादेरपि भगवतैव संपादितत्वात् तेनैव तस्य सुकृतत्व परिकल्पनाच्च तत्सापेक्षत्वमपि भगवदभिप्रायकम्। [3]''तल्लब्ध-स्वावकाश प्रथमगुरु कृपागृह्यमाणः'' [4]''घुणक्षतलिपिक्रमादुप-निपातिनः पातिनः'' [5]''निदानं तत्रापि स्वयमखिलनिर्माणनिपुणः''

---

1. पांच 2. शा.मी. (2-3-41)

3. 4. 5.

इति हि वेदान्ताचार्योक्तिः। अतो ''यमेवैष वृणुते'' इति श्रुतेः यथोक्त एवार्थः।

श्रीमद्भागवते च अस्याः श्रुतेरर्थविवक्षया उक्तं [1]''येषां स एव भगवान् दययेदनन्तस्सर्वात्मना श्रुततपो यदि निर्व्यलीकम्। ते दुस्तरामपि तरन्ति च देवमायां नैषां ममाहमितिधीः श्वश्रृगालभक्ष्ये।'' इति। वृणुते - स्वीकरोति। [2]''न नमेयं'' इति निर्बन्धरूप - शासनातिवृत्तिव्यवसाय - विराममात्रेण अनाद्यनन्त कल्पोपचित दुर्विषहानन्तापराधानादरेण ''मे भक्तः'' इति स्वकीयत्वाभिमानेन [3]''न त्यजेयं कथञ्चन'' इति केनचिदपि अविचाल्यतया स्वीकरोतीत्यर्थः। तथाच उच्यते [4]''चितः परमचिल्लाभे प्रपत्तिरपि नोपधिः। विपर्ययेतु नैवास्य प्रतिषेधाय पातकम्'' इति। उक्तप्रकारेण तन्निर्हेतुकदयैव आत्मोज्जीवनकारणं इत्युक्तं भवति। तेन लभ्य इति - तेन पुरुषेण स्ववरणीयेन लब्धुं योग्य इत्यर्थः। [5]''ददामि'' ''नाशयामि'' इत्युक्तप्रकारेण वरणानन्तरं प्राप्तिपर्यन्तं संपादनीयाया अधिकारपूर्तेः भगवतैव संपाद्यत्वात्, योगभ्रंशाद्यभावेन भगवल्लाभपर्यवसानमवश्यंभावीति भावः। अयमर्थः श्रुतप्रकाशिकाचार्यैः अखिलेत्यादि भाष्ये भूतशब्दं विवृण्वद्भिः सुव्यक्तमुक्तः भगवत् ज्ञानेन लब्धसत्ताकत्वं भूतशब्दार्थः, [6]'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः'' इति हि श्रुतिः।

---

1. भागवते 2. रा.मु. (36-11) 3. रा.मु. (18-3) 4.
5. गीता (10-10) 6. तै.आ.

लब्धस्वरूपाणां च ''तेषामेव अनुकम्पार्थं अहं अज्ञानजं तमः। नाशयाम्यात्मभावस्थः'' ''ददामि बुद्धियोगं तं'' ''अहं स्मरामि मद्भक्तं'' इत्याद्युक्तप्रकारेण साक्षात्कारविरोधिनिवर्तनादिकं हि भगवत एव भर इति न स्वरूपप्रच्युति सम्भवः'' इति। [1]''नेहाभिक्रमनाशोस्ति प्रत्यवायो न विद्यते। स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्'' इत्युक्तं अत्र कैमुत्य सिद्धम्।

अथ तस्य कालक्षेपप्रकारमाह – ''तस्यैष आत्मा विवृणुते तनूं स्वां'' इति। तस्य-स्वस्वीकृतस्य पुरुषस्य। एष आत्मा-स्वीकरण कर्तैव परमात्मा। अत्रात्मशब्देन सर्वस्मिन् वस्तुनि भगवदात्मकत्वानुसन्धानेन अनुकूलत्व प्रतिपत्ति सिद्धिहेतुभूत सर्वात्मकत्वं विवक्षितम्। स्वां तनूं-स्वासाधारणमप्राकृतदिव्यमङ्गलविग्रहमित्यर्थः। विवृणुते - प्रकाशयति। [2]''परित्राणाय साधूनां'' इतिवत्। अवलोकनालापादिदानेन निरन्तरानुभाव्यो भवतीति भावः। अत एवंभूतं भगवतोनन्योपायत्वमेव निर्हेतुकमित्यभिप्रायेण [3]''अनन्योपायत्व श्रवणात्'' इति अस्या अर्थः संग्रहेण भाष्ये अभिहितः।

दीपसारयोरपि - अयमेवार्थः प्रतिपादितः। दीपे तावत् [4]''उपपत्तेश्च'' 'अमृतस्य एष सेतुः' इत्यमृतस्य स्वस्य स्वयमेव प्रापक इति सेतुत्वव्यपदेशोपपत्तेश्च अन्यत्परं अस्तीति कल्पनं न युज्यते। 'नायमात्मा प्रवचनेन लभ्यः यमेवैष वृणुते तेन लभ्यः'

---

1. गीता (2–40) 2. गीता (4–8) 3. शा.मी. (3–2–34) भा.
4. शा.मी. (3–2–34)

इति हि श्रूयते "इति। सारेपि तत्रैव सूत्रे प्राप्यस्यैव परमात्मनः प्रापकत्वोपपत्तेः यथा हि "यमेवैष वृणुते तेन लभ्यः" इति। गद्ये [1]"केवलं मदीययैव दयया" इति। श्रीरंगगद्ये च "देहि मे कृपया नाथ नजाने गतिमन्यथा" इति। तथा पूर्वाचार्यैस्सर्वैरपि भगवद्दयायाः निरुपाधिकत्वं बहुशः प्रतिपादितम्। अतो यथोक्त एव अस्याः श्रुतेरर्थः।

भाष्ये प्रथमसूत्रे वेदार्थसंग्रहे च भक्तिपरतया यदियं श्रुतिर्व्याख्याता। सोपि अस्याः श्रुतेः अर्थो भवति। तर्हि तत्र भक्तेः साधनत्व प्रतिपादनात् पूर्वोक्तानन्योपायत्वेन विरुद्धगत इति चेन्न — भक्तिस्तु द्विविधा साध्यभक्तिः साधनभक्तिश्चेति। यद्यपि भक्तेः साधनत्वांशेन विरोधः तथापि साध्यभक्तेः भक्तिस्वरूपस्य च विरोधाभावेन, अनन्योपायस्यापि परमभक्तिपर्यन्ताधिकार पौष्कल्य सम्पत्तावेव प्राप्ति सिद्धेः तत्र च कर्म ज्ञानभक्तीनां स्वरूपत्यागाभावात्, अधिकारसंपत्तये सर्वेषां अनुष्ठेयत्वाच्च न विरोधगन्धः। [2]"तदधिगमे" इत्याद्यधिकरणे "ब्रह्मविद्याप्राप्तौ" इति भाष्यस्य श्रुतप्रकाशिकायां "ब्रह्मविद्याप्राप्तिः साक्षात्कारावस्थोपासन लब्धिर्विवक्षिता। 'तस्मिन् दृष्टे—क्षीयन्ते' इति हि विषय वाक्यम्। प्राप्तिः- उपक्रमः। विद्या प्राप्तिशब्दः साधारण्यात् प्रपदन निष्पत्तेरपि द्योतकः" इति व्याख्यातत्वात् प्रपदननिष्पत्त्यनन्तरमेव सर्वकर्म-

---

1. गद्यत्रयं   2. शा.मी. (4-1-13)

निवृत्तिः प्रतिपाद्यते। किञ्च भाष्ये प्रतिपादितायाश्च भक्तेः आकारद्वयमस्ति – साधनत्वं फलत्वं चेति। चतुर्थाध्यायारम्भभाष्ये "अथ इदानीं विद्यास्वरूपविशोधनपूर्वकं विद्याफलं चिन्त्यते" इत्यत्र श्रुतप्रकाशिकाचार्यैः "चतुर्थे फलमेव प्रधानतः प्रतिपाद्यं, विद्या विषये पूर्वं अनिरूपितांशश्च निरूप्यते, अस्य साध्यस्य इदं साधनमिति साध्यसाधनभाव संबन्ध ज्ञापनार्थं भक्तिरूपापन्न ज्ञानस्य प्रीतिरूपतया फलकोटिनिवेश ज्ञापनार्थं च" इति भक्तेः आकारद्वयं हि प्रतिपादितम्। वेदान्ताचार्यैश्च अधिकरणसारावल्यां "मुक्तावस्थासमं च स्थिरभजनरसंदातुं" इत्युक्तम्। "तदधिगमे" इत्यधिकरण भाष्येच "उपायभूतोपासनस्य उपास्यनिरतिशय-प्रियत्वेन स्वयमपि प्रियरूपत्वात् उपेयरूपत्वमप्यस्तीति तत्र तन्निरूपणं कृतम्। "दश्यमानो महोरगैः। न विवेदात्मनो गात्रं तत्स्मृत्याह्लाद संस्थितः।। "तच्चित्तविमलाह्लादक्षीणपुण्यचयातदा। इत्यादिभिः प्रीतिरूपत्वं ह्यवगम्यते" इति श्रुतप्रकाशिका। अतो भक्तेः आकार द्वयस्य विद्यमानत्वात् प्रपदनोपाय निष्ठस्य च भक्तेस्साधनत्वाकारमात्रस्य त्याज्यत्वात् भक्तिस्वरूपस्य तत्प्राप्यत्वा-कारस्य च अधिकारसम्पत्त्यर्थं अत्यन्तं उपादेयत्वात् प्राप्ति समये च भगवतो वरणीयेनैव लभ्यत्वात् वरणीय गुणभूताया भक्तेः प्राप्तिसमयाव्यवहितपूर्ववृत्तित्वावश्यंभावात् अनन्योपायस्यापि अधिकारिणः शरीर यात्राशेषतया कर्मज्ञानभजन प्रपदनानां कैङ्कर्य

स्वरूपप्रकारा प्राप्यरुचि स्वरूपयाथात्म्यज्ञानेषु अन्तर्भूततया तेन आकारेण अवश्यं अनुष्ठेयत्वाच्च अस्या एव 'नायं आत्मा' इत्यादि श्रुतेः वरणीय गुणविशेष परतया भाष्यकारैः व्याख्यानं नानुमन्तव्यम्। अत एव च [1]"तत्प्राप्तये च तत्पादांबुजद्वयप्रपत्तेः अन्यत् न मे कल्पकोटि सहस्रेणापि साधनमस्तीति मन्वानः" इति वदद्भिरेव भाष्यकारैः [2]"स्थानत्रयोदित परभक्तियुक्तं मां कुरुष्व; परभक्तिपरज्ञानपरमभक्त्येक स्वभावं मां कुरुष्व" [3]"आदाय भक्तियोगाख्यं रत्नं संदर्शयामि" इति च अभिहितम्। [4]"नित्यकैङ्कर्य प्राप्त्युपायभूत भक्तितदुपाय सम्यग्ज्ञानतदुपाय समीचीनक्रिया तदनुगुण सात्विकतास्तिक्यादि समस्तात्मगुण विहीनः" इति स्थलान्तरे तैरेवोक्तम्। अन्यैश्चाभियुक्तैः "एतावन्तं सन्दधानं" इत्यारभ्य "तां देव भक्तिरूपां कुरुष्व मे। परभक्तिं परज्ञानं परमां भक्तिसंपदम्॥ आविष्कुरु" इत्यादिना "यावत्प्राप्त्यनुवर्तनं" इत्यन्तं प्राप्तेः पूर्वकालवश्यंभाविनां अधिकारपौष्कल्यार्थप्रार्थना कृता। ततोस्याः श्रुतेः "अनन्योपायत्व श्रवणात्" इत्यादि भाष्यदीप-सारगतवाक्यानां भाष्ये प्रथमसूत्रगत व्याख्यान वेदार्थसङ्ग्रहगत वाक्यानां च सिद्धोपायतत्स्वरूप तत्कृत्यपरतया न परस्पर विरोधगन्धः।

1, 2, 3, 4. गद्यत्रयं

तथाच प्रप्तिपूर्वक्षणभाविभक्तिपरत्वं अस्याः श्रुतेः वेदार्थसङ्ग्रहे स्फुटतरं प्रतिपादितम्। "तदेव ध्यानं पुनरपि विशिनष्टि" नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूं स्वां' इति भक्तिरूपापन्नानुध्यानेनैव लभ्यते परः पुरुष इति। यथोक्तं भगवता [1]"पुरुषस्स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।' [2]'भक्त्या त्वनन्यया शक्यः अहं एवंविधोर्जुन। ज्ञातुं द्रष्टुं च तत्वेन प्रवेष्टुंच परंतप।' [3]'भक्त्या मामभिजानाति यावान् यश्चास्मि तत्वतः। ततो मां तत्वतो ज्ञात्वा विशते तदनन्तरम्' इति। तदनन्तरं मां तत एव भक्तेः विशत इत्यर्थः। भक्तिरपि निरतिशय प्रियानन्यप्रयोजन स्वेतर वैतृष्ण्यावहज्ञान विशेषएवेति तद्युक्त एव तेन परेणात्मना वरणीयो भवति तेन लभ्यत इति श्रुत्यर्थः" इति। [4]"यथोदितक्रमपरिणत भक्त्यैकलभ्यः" इतिच। तत्रैवान्यत्र [5]"सोयं परब्रह्मभूतः पुरुषोत्तमः निरतिशयपुण्यसञ्चयप्रक्षीणाशेष जन्मोपचितपापराशिः परमपुरुष चरणारविन्दशरणागतिजनिततदाभिमुख्यस्य, सदाचार्योपबृंहित शास्त्राधिगत तत्वयाथात्मयावबोधपूर्वकाहरहरुपचीयमान शमदम-तपश्शौचक्षमार्जव भयाभयस्थानविवेक दयाद्यहिंसाद्यात्मगुणोपेतस्य वर्णाश्रमोचितपरमपुरुषाराधन नित्यनैमित्तिक कर्मोपसंहृति-निषिद्धपरिहार निष्ठस्य परमपुरुषचरणयुगल न्यस्तात्मात्मीयस्य

---

1. गीता (8-22) 2. गीता (11-54) 3. गीता (18-55)
4, 5. वे.स.

तत्प्रीतिकारितानवरतस्तुतिस्मृति नमस्कृतियतनकीर्तन श्रवणवचन-ध्यानार्चन प्रणामादि प्रीत परमकारुणिक पुरुषोत्तम प्रसाद-विध्वस्तस्वान्तध्वान्तस्य अनन्यप्रयोजनानवरतनिरतिशयप्रिय विशदतम प्रत्यक्षतापन्नानुध्यानरूप भक्त्यैकलभ्यः'' इति च। अस्यार्थश्च एतच्छ्रुतप्रकाशिकायां विस्तरेण द्रष्टव्यः।

ननु-प्रपदनस्य सर्वाधिकारत्वात् वेदान्तविहिताया भक्तेश्च अधिकृताधिकारत्वात् कथं प्रपदननिष्ठे कर्मज्ञानाङ्गक भक्त्यनुष्ठानम्; यद्यपि त्रैवर्णिकेषु सम्भवति, तद्व्यतिरिक्तेषु न कथञ्चिदपि सम्भवति; अन्यथा अपशूद्राधिकरणन्यायविरोधस्स्यात्; प्रपदननिष्ठ भक्तेः व्यक्त्यन्तरत्वे वेदान्त विहितत्वाभावेन तदनुष्ठानं कामकारस्स्यात्; [1]''कामाद्गोप्यः'' इत्याद्युक्तभक्तिश्चेत् तस्याः अपि पूर्वोक्तदोषः; तत्कथं अस्मिन्नधिकारिणि तदनुष्ठानमिति। उच्यते। उपनयनाङ्गक स्वाध्यायाध्ययन तदर्थश्रवणतन्मनन सहकृतध्रुवानुस्मृतित्वदर्शन समानाकारत्व भक्तिरूपत्वापन्नं यज्ञादिकर्माङ्गकं यत् ध्यानं तदधिकृताधिकारमेव। यत्तु जन्मान्तर संस्कारवशात् विदुरादिषु दृष्टं तत्र न अपशूद्राधिकरणनयविरोधः। यच्च केषुचित् व्यक्ति विशेषेषु कर्मज्ञानस्थानीय भगवन्निरंकुश स्वातन्त्र्य जनित दयाविशेषेण भक्तिर्जायते तस्य भक्तिरूपापन्नज्ञानस्य सर्वाधिकारत्वात् स्मर्य माणात्यर्थप्रियत्वकृतप्रियत्ववत्तया प्राप्यरूपत्वात्, सिद्धोपाय

1. भाग

कार्यत्वेन च सत्वात् तस्मिंश्च अहरहनुष्ठीयमानत्वाभ्यासाधेया-तिशयत्वाप्रयाणानुवर्तमानत्वानवरतस्मृतिसन्ततिरूपत्व स्वस्व वर्णोचित कर्मदानतपोनशनार्चनस्तुतिश्रवणकीर्तनयतन प्रभृति-कर्मतत्सहकृतात्मयाथात्म्यज्ञान तदुभयहेतुभूत भगवच्चरणारविन्द शरणागतिप्रभृत्यङ्गकत्वादीनां विद्यमानत्वात् अस्य सर्वस्य उपायफलत्वेन साधनान्तरत्याग वचनविरोधाभावात्, ईदृश्या: एव भक्ते: [1]"मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु। मामेव एष्यसि युक्त्वैवमात्मानं मत्परायण:॥" इति गीता शास्त्रे विहितत्वात्, तत्र च [2]"समोहं सर्वभूतेषु" इत्यारभ्य [3]"स्त्रियो वैश्यास्तथा शूद्रा:" इति सर्वाधिकारत्वस्योक्तत्वाच्च। एवंविध-भक्तिपरतया च नायमात्मेत्यादि श्रुतिव्याख्यानं युज्यते।

तथा च श्रीमद्गीताभाष्ये [4]"ममेमं परममतिलोकं स्वभावं श्रृणु" इतीमं श्लोकं अवतार्य 'देवतिर्यङ्मनुष्यस्थावरात्मना अवस्थितेषु जातितश्चाकारतस्स्वभावतो ज्ञानतश्च अत्यन्तोत्कृष्टाप-कृष्टरूपेण वर्तमानेषु सर्वेषु भूतेषु समाश्रयणीयत्वेन "समोहं" इति गीताशास्त्रप्रतिपादित भक्ते: सर्वाधिकारत्वं प्रतिपादितम्। इदं च भाष्यं वेदान्ताचार्यै: भक्त्यधिकारि प्रतिपादन परमिति तात्पर्यचन्द्रिकायां व्याख्यातम् "अथ भक्तियोगाधिकारि प्रशंसनपरे 'समोह' मिति श्लोके तु जात्याकारादितारतम्यानादरेण भक्तै

---

1. गीता (9–34) 2. गीता (9–29). 3. गीता (9–32)

4. गीता (9–29) भा.

स्वस्यैकरस्य मुच्यते'' इत्यादिना। विस्तरस्तु तत्रैव द्रष्टव्य:। एतच्छ्लोक भाष्यस्य चन्द्रिकायामेव अस्या: सर्वाधिकारत्वे अपशूद्राधिकरणनय विरोधाभावमभिप्रेत्य तिर्यगधिकरण विरोधाभाव: अस्या: कर्माङ्गकत्व सम्भव:, जात्याद्यपकर्षस्य अनिन्द्यात्मकत्वं च प्रतिपादितानि। ''तिरश्चामपि गजेन्द्र वानरेन्द्रादिषु पुण्याधिक्यनिबन्धन ज्ञानविशेषवत्सु प्रथितम्। तस्मान्नतिर्यगधिकरणविरोध:'' इति। अनेन अपशूद्राधिकरणन्याय विरोध विरहोपि अभिप्रेत:। ''स्त्रियो वैश्या: तथाशूद्रा:'' इति शूद्राणां अपि अधिकारप्रतिपादनात्। [1]''सत्वजाति प्रतिनियतधर्मै: भजनात् न अपकृष्टजाति निर्देशविरोध:'' इति च। [2]''एवं समाश्रयणीय-वरणस्वीकारयो: जात्युत्कर्षो न किंचित्कर इत्युक्तम्'' इति च। [3]''मां हि पार्थ'' इत्यादि श्लोकभाष्ये च ''स्त्रियो वैश्या: शूद्राश्च पापयोनयोपि मां व्यपाश्रित्य परां गतिं यान्ति'' इतिसर्वाधिकारत्वं व्यक्तमुक्तम्। अत्र सर्वत्र समाश्रयणपदं भजनपरमिति ''भक्त्यधिकारि प्रशंसनपरे'' इति चन्द्रिकावाक्येन भजस्वेत्युत्तरश्लोकस्थ भजन शब्देन च ज्ञायते। अत्रापि चन्द्रिका - ''जन्मत एव पापिष्ठानां जात्याद्यापकर्षेपि स्वसमाश्रयणमात्रेण फलसिद्धिं प्राक् प्रस्तुतां प्रपञ्च्य'' इत्यादि। ''अपि चेत्'' इत्यादिश्लोकभाष्ये च बहूक्तं। ''पत्रं पुष्पं'' इत्यादि श्लोकभाष्येच चन्द्रिका ''य इति

---

1. गीता (9–29) भा.चं 2. गीता (9–30) भा.चं

3. गीता (9–32)

सामान्यनिर्देशेन सापराधनिरपराध जडाजडादि विभागं न पश्यामि इत्याद्यभिप्रेतं'' इत्यादिका। वरणीयगुणभूताया भक्तेः प्राप्त्यव्यवहित पूर्वकालवृत्तित्वनियमं [1]''यो मुमुक्षुः वेदान्तविहित वेदनरूप-ध्यानादिनिष्ठः यदा तस्य तस्मिन्नेव अनुध्याने अनवधिकातिशया प्रीतिः जायते, तदैव तेन लभ्यते परः पुरुषः'' इति प्रतिपाद्य, अस्या एव भक्तेः कर्मज्ञानानुगृहीतत्वं [2]''एवंविधपरभक्तिरूपज्ञान विशेषस्योत्पादकः पूर्वोक्ताहरहरुपचीयमान ज्ञानपूर्वककर्मानुगृहीत भक्तियोग एव। यथोक्तं भगवता पराशरेण [3]''वर्णाश्रमाचारवता पुरुषेण परःपुमान्। विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः।।'' इति। निखिल जगदुद्धारणायावनितलेवतीर्णः परब्रह्मभूतः पुरुषोत्तमः स्वयमेवैतदुक्तवान् [4]'स्वकर्म निरतस्सिद्धिं यथा विन्दति तच्छृणु। यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं।। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः।' 'इति यथोचित क्रमपरिणत भक्त्यैकलभ्य एवेति भगवद्बोधायन टङ्कद्रमिडगुहदेवकपर्दिभारुचिप्रभृत्यविगीत शिष्ट-परिगृहीत पुरातन वेदवेदान्तव्याख्यान सुव्यक्तार्थ श्रुतिनिकर निदर्शितोयं पन्थाः'' इति संप्रदाय परंपरानिर्देश पूर्वकं विस्तरेणोप-पन्नं प्रतिपादितं। अत्र सामान्येन ''कर्मानुगृहीत भक्तियोग एव'' इत्युक्तम्। न तु यज्ञाद्यनुगृहीत इति। अत एव स्वजातिप्रतिनियत धर्मएव विवक्षितः। उदाहृतवचने ''वर्णाश्रमाचारवता पुरुषेण परः

---

1. वे.सं. 2. वे.सं. 3. वि.पु. (3-8-9) 4. गीता (18-45)

पुमान्'' इत्यविशेषेणोक्तम्, न तु द्विजेनेति। भगवतश्च ''निखिल जगदुद्धारणाय अवनितलेवतीर्णः'' इति विशेषणेन स्वोपदिष्ट भक्तेः निखिलजगदुद्धरणहेतुत्वं भगवतो विवक्षितमिति गम्यते। तद्वचनेच ''स्वकर्मनिरतः मानवः'' इति सामान्येनोक्तम्, न तु यज्ञादि निरतो द्विज इति। [1]''यतः प्रवृत्तिः'' इत्यादिना च सर्वेषामप्यविशेषेण स्वाराधकत्वं स्वस्य च सर्वैराराध्यत्वं च गम्यते। स्वकर्मणा स्वस्व जातिप्रतिनियतकर्मणा इत्यर्थः। अस्मिन्नर्थे मन्दमतीनां विप्रतिपत्तिशमनाय संप्रदायप्रदर्शनं कृतम्। अयमेवार्थो नवमेध्याये ''मन्मना भव'' इति श्लोकेन भगवतोपदिष्ट इति भाष्यकारैरादितः प्रभृति गीताभाष्ये प्रपञ्चितः तत्सर्वं विमत्सरैः प्रमाणपरतन्त्रैः सारासारविद्भिर्गरीयोभिः तत्रैव द्रष्टव्यम्।

[2]''मन्मनाभव'' इत्यादिश्लोकभाष्ये च अयमेवार्थः स्फुटतरं प्रतिपादितः। तथाहि – ''भक्तिस्वरूपमाह'' इति मन्मनाः इत्यादिश्लोकमवतार्य, मन्मना इत्यत्र अस्मच्छब्दस्य विवक्षितमर्थं ''सर्वेश्वरेश्वरे'' इत्यारभ्य ''सर्वस्वामिनि'' इत्यन्तमुक्त्वा ''तैलधारा वदविच्छेदेन निविष्टमना भव इति मनश्शब्दार्थ उक्तः। अस्यास्तु सर्वाधिकारभक्तेः वेदान्तोदितत्व ज्ञापनायैव तद्भाष्यचन्द्रिका - 'निदिध्यासितव्यः' 'ध्यायीत' 'ध्रुवास्मृतिः' 'आवृत्तिर-सकृदुपदेशात्' इत्याद्यनुसन्धानेन मनश्शब्दस्य अत्र ध्यानाख्य

1. गीता (18–49) 2. गीता (9–33)

मनोवृत्तिविशेषविषयतामाह'' इति। मद्भक्तशब्दस्यापि भाष्यं – ''तदेव विशिनष्टि, मद्भक्तः - अत्यर्थमत्प्रियत्वेन युक्तः मन्मना भवेत्युक्तः'' इति। अस्यापि चन्द्रिका ''यमेवैष वृणुते तेनलभ्यः'' इति श्रुत्युपबृंहणतामभिप्रेत्याह'' इति। एवं मद्भक्तशब्दार्थविषयतया श्रुतिं उदाहरता चन्द्रिकाकारेण अस्याः श्रुतेः प्राप्यरुचिभूत साध्यभक्तिपरत्वं भाष्यकारैः विवक्षितमिति स्फुटीकृतम्। 'मद्याजी' पद भाष्यवाक्येषु यजनशब्दस्य पूर्वोक्त भक्तिरूपानुगुणमर्थमाह ''यजनं नाम-परिपूर्णशेषवृत्तिः। औपचारिक सांस्पर्शिकाभ्यवहारिकादि सकलभोग प्रदानरूपो हि यागः' इति। अस्यापि चन्द्रिका – ''भक्तिस्वरूपविशेषनिष्कर्ष परत्वात् तदसाधारण शास्त्रविशेष - प्रतिपादितपूजा - विशेषपरोयं यजनशब्द इत्यभिप्रायेणाह – यजनं नामेति। शेषवृत्तिः- कैङ्कर्यं। इदंच – [1]''पत्रं पुष्पं'' इत्यादिना प्रदर्शितस्य भगवच्छास्त्रप्रपञ्चितस्य संग्रहशासनम्। अतोत्र 'यजिः' दर्शपूर्णमासादिविषय इति न भ्रमितव्यम्। ''यज-देवपूजायां'' इत्येवच पठ्यते। 'देवतामुद्दिश्य द्रव्यत्यागो यागः' इति च आहुः। अग्निहोत्रादिव्यतिरिक्तेष्वपि पञ्चमहायज्ञादिषु यजिर्निरुढः। अन्यत्र अपि ''कृष्णो वाक्यैरिज्यते...'' इत्यादयः प्रयोगाः अतोत्र भगवच्छास्त्रप्रपञ्चित विषयोयं यजिरित्यभिप्रायेणाह औपचारिकेत्यादि'' इति। [2]''यज्ञेन

---

1. गीता (9-26)

2. बृहदा (6-4) .

दानेन'' इत्यादिश्रुतौ यज्ञशब्दस्य . कैङ्कर्यपरत्वमपि विवक्षितं। दानादिकन्तु सर्ववर्णसाधारणम्। एतद!भिप्रायेण हि श्रुतप्रकाशिकायां [1]''अन्तरा चापि'' इत्यधिकरणे ''आश्रमधर्मानुपपत्तौ वर्णधर्मैरनुग्रह इत्यर्थ:'' इत्युक्तम्। अतोस्य भक्ते: ''यज्ञेन'' इत्याद्युक्तं कर्माङ्गकत्वं च न विरुद्ध्यते। ज्ञानाङ्गकत्वं च – ''स्थावरेष्वपि शापादि जातेपु क्वचित् ज्ञानं महर्षय: कथयन्ति। ततश्च मनोवृत्तिरूप-समाश्रयणं तत्रापि सम्भवेदेव'' इति तात्पर्यचन्द्रिकावाक्योक्त प्रकारेणोपपद्यते। अत: यामुनाचार्योक्तं [2]''उभयपरिकर्मितस्वान्त-स्यैकान्तिकात्यन्तिक भक्तियोगैकलभ्य:'' [3]''स्वधर्मज्ञानवैराग्य साध्यभक्त्येकगोचर:'' इत्यादिकमप्युपपन्नतरम्। मत्परायणपदभाष्यं च ''अहमेव परमयनं यस्यासौ मत्परायण: मया विना आत्मधारणा-संभावनया मदाश्रय: इत्यर्थ:'' इति। अत्रापि चन्द्रिका – ''एषैव भक्ते: परमाकाष्ठा प्राप्तेरव्यवहितपूर्वभाविनी इति फलाभिलाष ज्ञापनार्थो मत्परायण शब्द इत्यभिप्राय:'' इति। अत्रास्य भक्ते: प्राप्यरुचिरूपत्वं स्फुटतरमुक्तम्। एतच्छ्लोकनिगमन - भाष्ये च सर्वं स्फुटतरं प्रतिपादितं – ''तदेवं लौकिकानि शरीर धारणार्थानि वैदिकानि नित्यनैमित्तिकानि कर्माणि मत्प्रीतये मत्प्रियो मच्छेषतैकरस: मयैव कारित इति कुर्वन् सततं मत्कीर्तनयतनस्तुति-नमस्कारादिकान् मत्प्रीत्या कुर्वाण: मन्नियाम्यं निखिलं जगत्

1. ब्र.मी. (3-4-36)   2. आत्मसिद्धौ   3. गीतार्थसंग्रहे -1

मच्छेषतैकरसं इत्यनुसंदधानो अत्यर्थमत्प्रिय मद्गुणगणं चानुसंधाय अहरहरुक्तलक्षणं उपासनमुपादधानो मामेव प्राप्स्यसि'' इति। अस्यापि चन्द्रिका – ''अथ सुखग्रहणाय अध्याय प्रधानार्थ-भूतसाङ्गोपाङ्ग फलशिरस्कभक्तिस्वरूपं सङ्क्षेपेण निष्कृष्य वदन्नुपसंहरति'' इत्यादिका। तत्रैवोक्तलक्षणप्रतीकं उपादाय ''अनन्यप्रयोजन नमस्कारादि प्रेरकमदेकधारकत्वदशापर्यन्त निरतिशय प्रीतिरूपमित्यर्थ:'' इति तद्विवृतम्। अत्र सर्वाधिकाराया: साध्यभक्तेरपि वेदान्तोदित समस्ताकार विशिष्टत्वं अविशिष्टमिति भाष्य-चन्द्रिकाकृतो भाव:, अत एव एवंभूत भक्त्यभिप्रायेण हि पूर्वै: प्रपदनपरतया योजिताया द्रमिडोपनिषदो भक्तिपरतया भाष्यकार योजनमित: परे सर्वेप्याचार्या: अङ्गीकुर्वन्ति। अपशूद्राधिकरणविरोध: तस्या उपनयनाद्यपेक्षवेदान्तवाक्यैकजन्यत्व पक्षे; स पुन:। [1]''दिव्यं ददामि ते चक्षु:'' इतिवत् भगवत्प्रसाद विशेषेण वा गीतोपदेशादिवत् कृष्णद्वैपायनशुकशौनकशठजित् प्रभृति महापुरुषोपदेशेन वा विदुरा-दिवत् पूर्वजन्म सुकृतविशेषेणवा जन्यते। अत एकस्या एव भक्तिव्यक्ते: साधनत्व - साध्यत्ववेदान्त वाक्य जन्यत्वोपदेशादि जन्यत्वाधिकृताधिकारत्व - सर्वाधिकारत्व यज्ञाद्यङ्गकत्वस्वस्व वर्णानुगुण कर्मज्ञानाङ्गकत्वरूपाकारवैषम्येप्यहरहरनुवर्तमानत्वाभ्या साधेयातिशयत्वाप्रयाणादनुवर्तमानत्व ध्रुवानुस्मृतित्व दर्शन-

---

1. गीता (11–8)

समानाकारत्व प्रीतिरूपापन्नत्व ध्यानार्चन प्रणामस्तुतियतनकीर्तनाङ्ग-कत्वादीनां साधारण्यात् अस्याश्च अनन्य साध्यतया अनन्यप्रयोजन तया च अधिकारपौष्कल्य सिद्ध्यर्थं प्राप्तेरव्यवहित पूर्ववृत्तित्वरूप साधनत्वव्यपदेशोपपत्त्याच, प्रथम सूत्रव्याख्याने 'नायमात्मे' त्यादिश्रुते: भक्तिपरतया व्याख्यानस्य तृतीयाध्यायोक्ताऽनन्योपायत्वपरतया व्याख्यानं न विरोधावहमिति। विनियोगपृथक्त्वेन अर्थद्वयप्रतिपादकत्ववर्णनं श्रुतेर्न विहन्यत इति सर्वमुपपन्नम्। अत: कामकारत्वदोषप्रसक्तिशङ्का अत्र नावतरति।

अथ अस्य श्रुते: भक्तिपरतया प्रतिपदार्थस्तु श्रुतप्रकाशिकायां विस्तरेणोक्त इति कृत्वा तेन विरोधपरिहाररूपतया प्रतिपदार्थोपि तदभिप्रायानुसारेण किञ्चित् लिख्यते। तथाहि "एवं प्रत्यक्षतापन्नां अपवर्गसाधनभूतां स्मृतिं विशिनष्टि" इत्यवतार्य "नायमात्मा" इत्यादि श्रुतिमुदाहृत्य "अनेन" इत्यादिना "तेनैव लभ्यते पर आत्मेत्युक्तं भवति" इत्यन्तेन भाष्येण सा श्रुतिर्व्याख्याता भाष्यकारै:, भाष्यार्थोपि श्रुतप्रकाशिकायां प्रपञ्चित:; उभयत्रापि पूर्वोक्तानन्यो-पायत्वप्रतिपादनस्य न कोपि विरोधो दृश्यते। ननु - "अपवर्ग साधनभूतां" इति भाष्यं विरुध्यत इति चेन्न; अनन्य साधनेप्यधि-कारिणि भक्ते: प्राप्ते: पूर्ववृत्तित्वरूपसाधनत्वस्य अधिकार पौष्कल्यार्थतया वक्तुं शक्यत्वात्। भाष्ये स्वत: प्रपदनाधिकारी

न विवक्षित इति चेन्न" [1]"नानाशब्दादि भेदादिति तु कथयता सूत्रकारेण सम्यक् न्यासोपासे विभिन्ने यजनहवनवत् शब्द भेदादभाक्तात्" इति वेदान्ताचार्यैः स्वतः प्रपदनस्य सूत्रकार विवक्षितत्वोक्त्या भाष्यकार विवक्षा भावप्रतिपादनानुपपत्तेः। किञ्च - श्रुतप्रकाशिकायां अखिलेत्यादिभाष्यविवरणे "विशेषेण नताः प्रह्वीभूताः- विनताः- न्यासोपासनात्मकाशेषविद्या विशेषनिष्ठाः विवक्षिताः इत्युभयविधाधिकारि प्रतिपादनेन भाष्यस्य सर्वस्य प्रपदनाधिकारिविवक्षा विहिता। ततः प्रभृति श्रुतप्रकाशिकायां आपाद चूडं उभयविधाधिकारि विवक्षा तत्रतत्र बहुशो द्रष्टव्या। अतो अस्मिन्नधिकारिणि वेदान्ताचार्योक्त प्राप्तिपूर्ववृत्तित्व रूपार्थ विवक्षया "अपवर्ग साधनभूताम्" इति पदं न विरुद्ध्यते। अत एव एतत्पदव्यावर्त्यं प्रतीकोपासनमित्युक्तं श्रुतप्रकाशिकाचार्यैः" "अपवर्गसाधनभूतामिति प्रतीकोपासन व्यवच्छेदः" इति। नायमात्मेत्यादि पदानां पूर्ववदर्थः। अत्र प्रवचनमेधाश्रुतानां भक्तेरपेक्षितत्वेपि तत्तावन्मात्रसिद्ध्या अधिकारपौष्कल्यं न सिद्ध्यतीत्यभिप्रायेण भाष्ये – "केवलश्रवण" इत्याद्युक्तम्। अत एव "श्रवण मननिदिध्यासनानां वक्ष्यमाण विशेष विरहिता-नामित्यर्थः" इति श्रुतप्रकाशिकायां व्याख्यातम्। तत्रापि न किञ्चिद्विरोधः प्रतीयते। तावन्मात्रेण प्राप्तिसिद्ध्यभावात् तत्रापि

---

1. न्यासविंशति

मात्रशब्दसिद्धिः – [1]"न पृथिव्यां अग्निश्चेतव्यः" इतिवत् द्रष्टव्यम्। "यमेवैष आत्मा वृणुते तेनैव लभ्य इत्युक्तं" इति भाष्यं तु पूर्वोक्तार्थानुगुणमेव। तथा हि-"प्रियतम एव हि वरणीयो भवति" "यस्यायं निरतिशयप्रियः स एव अस्य प्रियतमो भवति" इति च भाष्यद्वयं विरुद्धमिति इति चेन्न; अस्यां योजनायां वरण शब्दस्य न स्वीकारमात्रमर्थः किन्तु [2]"क्षणेपि ते यद्विरहोतिदुः सहः" इत्युक्त प्रकारेण तस्मिन् भगवतो निरतिशयप्रीतिः सा च भगवतः स्वाश्रित वरणार्थ पुण्यक्षेत्र तदुपहृत पत्र पुष्पादि तत्सम्बन्धिपदार्थपर्यन्ताः एतत्सर्वं श्रुतप्रकाशिकायां विस्तरेणोक्तं। अत एवंभूतनिरतिशय प्रीत्या भगवतः स्वाश्रित संश्लेषणं तस्य स्वस्मिन्निरतिशयप्रीतिमत्व रूपाधिकार पौष्कल्ये सत्येव संभवतीति "प्रियतम एव हि वरणीयो भवति" इत्युक्तम्। तदुपपादकं – "यस्यायं" इत्यादि भाष्यम्। एवं सत्येव तमप्प्रत्ययनिरतिशयपदयोः स्वारस्यं, अत एव श्रुतप्रकाशिकायां "चेतनत्वे सति भगवता वरणीयत्वं निरतिशयप्रीतिमत एव" इत्युक्तम्। भाष्योदाहृत गीतावचनस्य च अयमेवाभिप्रायः। अत्र चेतनस्य भगवद्भक्तिमत्वोपाधिना तत्प्रीतिविषयत्वं चेद्विवक्षितं, अकृतप्रत्युपकारन्यायेन परमपुरुषस्य निरुपाधिकसुहृदोपि हेयपुरुष साधर्म्यात् वात्सल्यादिगुणाकरत्वं हीयेत; ज्ञानिशब्देन प्रियशब्दस्य पौनरुक्त्यं

---

1. यजु. (का 5. प्र2) 2. स्तो.र. (56)

चः प्रथमं "ज्ञानिनः" इत्युक्तत्वात् अधिकारः प्रतिपादितः, "प्रियोह्यहं" इति पश्चात् अधिकार पौष्कल्यं "सच मम प्रियः" इति तदनन्तरं वरणीयत्वमिति गम्यते। अत्र च शब्द एवार्थे। स एव मम प्रियः- तदानीमेव प्रियो हि स इत्यर्थः। [1]'तेषां' इत्यादि श्लोके च सततयुक्तानामिति प्राप्यत्वरा विवक्षिता। सततयोगं – नित्ययोगं – प्राप्तिं कांक्षमाणानामिति हि अस्यार्थः। "भजतां" इत्यनेन – प्राप्यत्वरया निरन्तरभजनमुच्यते। "प्रीतिपूर्वकं ददामि" इत्यन्वयः। "आत्मभावस्थः" इत्ययं वरण प्रकारः। तस्यानुषङ्गिकव्यापारो बुद्धियोगदानं अज्ञानजतमोनाशनं च; तदुभयं न वरण प्रकारान्तर्गतम्। 'भजतां' इत्यनेन भगवत्प्रियत्वहेतुप्राप्ति पूर्वभाविभजनं उक्तं चेत्, "येनमां उपयान्ति – तं बुद्धियोगं ददामि" इत्यसंगतं स्यात्, तमो हि नाशयामीत्यपि तथा स्यात् अतोत्र बुद्धियोगो नाम – ऐकान्त्यावहाप्रच्युताध्यवसायः; अज्ञानमपि तद्विरोधि; इदमुभयं निरन्तरमानस साक्षात्कारेण सिद्ध्यतीत्यात्म भावस्थपदाभिप्रायः। एवंभूतयोः प्राप्यकोट्यन्तर्भूतत्वज्ञापनपरम्। "स्मर्यमाणात्यर्थ प्रियत्वेन स्वयमप्यर्थ प्रिया" इति भाष्यम् ; "स्मर्यमाणस्य भगवद्विषयस्य निरुपाधिकस्य निरवधिकानुकूलत्वेन तद्विषया स्मृतिरपि निरतिशयानुकूला भवति" इति अस्य श्रुतप्रकाशिका। अतोत्र

1. गीता (10–10)

भाष्ये न कुत्रापि "अनन्योपायत्व श्रवणात्" इति भाष्यस्य विरोधो दृश्यते एवंभूतनिरतिशयप्रीतिमान् यदा भवति अयमधिकारी तदा परमात्मनो वरणीयो भवति, तदानीमेव तेन वरणीयेन लभ्यते – प्राप्यते परमपुरुष इति "यमेवैष वृणुते तेन लभ्य:" इत्यस्यार्थ:। अत्र भाष्ये "तस्यैष आत्मा विवृणुते तनूं स्वाम्" इत्ययमंशो न व्याख्यात: पूर्वोक्तानुरोधेनास्यार्थ उच्यते;- तस्य तादृशवरणीयस्य, एष आत्मा – तस्मिन्निरतिशय प्रीतिमान् परमात्मा, स्वां तनुं – स्वासाधारण विग्रहजातं विवृणुते – [1]"पश्यामि देवान् तव देव देहे" इत्यादि प्रक्रियया प्रत्यभि-सन्धानार्हम्, [2]"पश्य मे योगमैश्वरं" इति प्रकाशयतीत्यर्थ:। अयमेव बुद्धियोगदानरूपो वरणप्रकार:। अस्मिन्नेव शरीरे स्वरूपरूप गुणविभवचेष्टितादीनि अतीतानागतानि वर्तमानानि च देशान्तर कालान्तर विप्रकृष्टान्यपि समानकालीनवत् समानदेशीयवत् सन्निकृष्टवत् प्रकाशयन् अनुभावयतीति तात्पर्यम्।

एतत्प्रतिबन्धकाज्ञाननिरसनम् 'वि' इत्युपसर्गेण विवक्षितम्। तदेव तमो नाशनम्। अयमेव प्रकारो वेदार्थ सङ्ग्रहे श्रीमद्गीताभाष्ये च कण्ठत: प्रतिपादित:। अत: न कस्यचित् केनचित् विरोध: अतोऽस्या: नायमात्मेत्यादि श्रुते: निर्हेतुक भगवद्विषयीकारपरता सिद्धोपायकृत्याधिकारपरता सिद्धोपाय कृत्याधिकार पौष्कल्यरूप

1. गीता (11–8) 2. गीता (11–15)

भक्तिपरता च भाष्यकारेणोक्ता, पूर्वाचार्यैस्सर्वैरप्यविगानेन सर्वोज्जीवनहेतुतया च बहुषु प्रबन्धेषु सर्वत्र प्रतिपादितेति सर्वत्र द्रष्टव्यम्। श्रीमद्गीतार्थसंग्रहे यामुनाचार्यैः§ [1]"कृपया केवलं" "मदीययैव कृपया", "नयतस्ते प्रसादतः" "कुरुष्व मामनुचरं दयया" इत्यादि पूर्वाचार्यसूक्तिशतं द्रष्टव्यम्। विशिष्य वेदान्ताचार्यैः द्रमिडोपनिषत्सारे तात्पर्यरत्नावल्यां च द्रमिडोपनिषदाचार्य विवक्षितत्वेन तत्र तत्र निर्हेतुकत्वं प्रतिपादितम्। द्रमिडोपनिषत्साराख्य प्रबन्धे प्रथमश्लोके [2]"निरुपधिक सुहृत्" इति, [3]"पंञ्चमाद्यैरनितर गतिताम्" [4]"फलमसौ फलावाप्ते हेतुस्स्वयमिति च निर्धार्य शतकैः" [5]"अनन्योपायः तद्दृढयति" *"निरवधिकनिर्हेतुकदया सरित्स्रोतः पद्मं शरणयति नाथस्य चरणम्" [6]"दयानिघ्नम् - शरण्यं दीनानाम्" [7]"अनाद्यन्तानन्तस्वरस करुणानन्द इति नः प्रणेतुर्व्यापारः प्रपदनपिपासार्ह उदितः- चिरविघटित स्वात्मघटन स्फुरच्छक्तिं" [8]"निदानं सिद्धीनां निरुपधि सुहृत्त्वं गणयति" "स्वसंबन्धाद्गोप्ता" [9]"निरुपधिकसौहार्दपिशुनैः" इति बहुशः ; तात्पर्य रत्नावल्यां च [10]"निरुपधि सुहृद्भावतः... स्वसिद्धेः स्वयमिह करणं श्रीधरः" [11]"निरुपधि सुहृदम्" [12]"अव्याजोदारभावात्" [13]"श्रीमान् सीमातिलङ्घि स्थिरतर. करुणः" [14]"तत्प्रसादाद्युपाये" इत्यादिभिः निर्हेतुक विषयीकारः

---

1. स्तो.र.(48) अत्र पंक्तिर्गलिता 2.द्र.सा.(1) 3. द्र.सा. (2) 4. द्र.सा. (9)
5. द्र.सा. (11) * 6. द्र.सा.(12) 7. द्र.सा.(13) 8. द्र.सा.(19) 9.द्र.सा.(21)
10. द्र.ता.(8) 11. द्र.ता.(115) 12.द्र.ता.(12) 13.द्र.ता.(117) 14.द्र.ता.(118)
§ अत्र पंक्तिर्गलिता

प्रपञ्चित:। इतर दिव्यसूरि- प्रबन्धेष्वपि अयमर्थ: स्फुटतर: प्रतिपादित इति नात्र आस्तिकाग्रेसराणां विप्रतिपत्तिर्जायत इति सर्वं समञ्जसम्।

श्रीमद्भागवते दशमस्कन्धे ''येषां स एव भगवान् दययेदनन्त: सर्वात्मनाश्रितपदो यदि निर्व्यलीकम्। ते दुस्तरामपि तरन्ति च देवमायां नैषां ममाहमितिधी: श्वश्रृगाल भक्ष्ये'' इति श्लोके स्फुटतरं प्रत्यपादि। भगवानित्यनेन-उपायत्वोपेयत्वोपयोगि गुणजातं विवक्षितम् स इति तथात्वे प्रसिद्धि: द्योत्यते, एवकारेण – तस्य निरपेक्षोपायत्वं अतोस्य दयाया न कश्चिद्व्याजोस्तीति भाव:। येषां दययेत् – यमेवैष वृणुते, येषामिति – भगवच्छासनातिवृत्ति व्यवसाय निवृत्तिमात्रवतामित्यर्थ: ; अयमर्थ: ''अनन्योपायत्व श्रवणात्'' इति भाष्येणोक्त:। अनन्तपदेन-सर्वत्र सर्वदा सर्वान्तर्यामित्वेन स्थिततत्वात्, दयाकरणस्य उचित समय देशसन्निधानं विवक्षितम्। ''सर्वात्मनाश्रितपद:'' इत्यनेन ''माता पिता'' इत्यादि [1]''गतिर्नारायण:'' [2]''वासुदेवस्सर्वम्'' इत्याद्युक्त प्रकारेण भगवति निरतिशयप्रीतिमत्तया तच्चरणारविन्दशरणागत इति अर्थ विशेषोभिप्रेत:। अनेन – भगवन्निर्हेतुक दयाफलं अधिकारपौष्कल्यं ''प्रियतम:'' इत्यादि प्रथमसूत्रभाष्योक्तमभिहितम्। ''श्रितपद:'' इति समाश्रयणं दयाहेतुत्वेन उच्यत इति चेन्न; श्रितपदो भगवानिति योजनायां पदशब्दस्य वैयर्थ्यात्; दययेत् इति. योजनायामपि

1. सुबालो   2. गीता (7-19)

यदिशब्दपौनरुक्तयं, लिङ्गैव यदि शब्दार्थ लब्धे:; व्यवहितान्वयश्च अत: श्रितपदो यदीत्येव योजना; अनन्त श्रितपद इति योजनायां सन् इत्यध्याहार:। निर्व्यलीकं - अकौटिल्येनेत्यर्थ:। उपायापायान्वयोत्र कौटिल्यम्। ते इत्युक्तपरामर्श:। दुस्तरां — [1]"मम माया दुरत्यया" इत्याद्युक्तां। अनन्तस्सर्वात्मना श्रितपदो यदि निर्व्यलीकम्। ते दुस्तरामपि तरन्ति च देवमायाम्" इति वचन व्यक्त्या "दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" इति गीतावचनं स्मर्यते। च एवार्थे। तरन्त्येवेत्यर्थ:। देव:- क्रीडापर:, माया-प्रकृति:; अनेन संसारोभिप्रेत:। दययेदित्यस्य, सर्वमुक्ति-प्रसङ्ग परिहारार्थम्, [2]"न नमेयम्" इति निर्बन्धाभाव मात्रमपेक्षितमित्यभिप्रायेणाह (नैषामित्यादि) श्वश्रृगालभक्ष्य:- देह:; ममाहमितिधी:, नेति — अहंकार ममकारनिवृत्तिरुच्यते। नेति - तस्या निश्शेष निवृत्तिर्विवक्षिता। एषामिति सन्निहितपरामर्शात् — इदमपि दयाफल मायातरणात्मकमिति ज्ञायते। संसार बीजभूतत्वादहन्ताममताधियो:। तन्निवृत्ति: फलं साक्षात् दयोदयकरी च सा [3]श्वश्रृगाल भक्ष्य इत्यनेन देहभोगस्य तद्भोगपरवशानां च हेयत्वं द्योत्यत इति सर्वमनवद्यम्।

इति मोर् मुन्नारय्यनपर नामधेय

वरदाचार्येण कृता **नायमात्मेति श्रुति व्याख्या** समाप्ता।।

---

1. गीता (7–14) 2. रा.यु. (39–11) 3. अत्र एका पंक्ति: अस्फुटाक्षरा